International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 155-156
© 2021 IJSR
www.anantaajournal.com
Received: 18-07-2021
Accepted: 28-08-2021

**सत्यकाम आर्य**
विद्याप्रबोधिनी महाविद्यालय, परवारी, उत्तरी गोवा, गोवा, भारत

**Corresponding Author:**
**सत्यकाम आर्य**
विद्याप्रबोधिनी महाविद्यालय, परवारी, उत्तरी गोवा, गोवा, भारत

# शास्त्रान्तरेषु व्याकरणस्य भूमिका

**सत्यकाम आर्य**

**प्रस्तावना**

मानवः सामाजिकः प्राणी वर्त्तते। सः एव स्वविचारान् सम्प्रेषयितुं भाषामुपयुङ्क्ते। कस्याः अपि भाषायाः प्रयोगशुद्धतां शब्दशुद्धतां तस्याश्च यथार्थस्वरुपमवगन्तुं व्याकरणस्य महदावश्यकता विद्यते। अद्यत्वे प्रायः जगति 3000 भाषाः प्रचलन्ति। सर्वासां भिन्नव्याकरणं विद्यते। व्याकरणेन विना मानवेन केवलं भाषायाः शुद्धोच्चारणं प्रयोगशुद्धतां च न ज्ञातुं शक्यते। उक्तमपि वाक्यपदीये–

''अर्थप्रवृत्तितत्वानां शब्दा एव निबन्धनम्।
तत्वावबोधः शब्दानां नास्ति व्याकरणादृते''[1]।।

अर्थात्– लोकः अर्थप्रवृत्यै वस्तूनां शब्दमाध्यमेन निबन्धनं करोति, किन्तु शब्दानां प्रयोगशुद्धतायाः स्वरुपशुद्धतायाश्चावबोधः व्याकरणादृते न भवति। जगति कस्यापि वस्तुनः यथार्थज्ञानं शब्दसम्पर्केण विना न ज्ञायते। साधुस्वरुपस्य च ज्ञानं व्याकरणादेव भवति। व्याकरणस्य प्रारम्भः कदा ? इति निश्चयेन कथनं कठिनम्, यतः भाषोत्पत्तिः पूर्वं परं च व्याकरणम्। किन्तु महाभाष्ये उद्धरणमस्ति यत्–''पुराकल्प एतदासीत् संस्कारोत्तरकालं ब्राह्मणाः व्याकरणं स्माधीयते''[2] उपर्युक्तवाक्येन ज्ञायते यत् पतंजलिः वैदिककालतः एव व्याकरणमासीदिति निश्चिनोति। महाभारतेऽपि हनुमतः वाक्पटुता दरीदृश्यते–

''नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरतानेन न किंचिदपभाषितम्''[3]।।

उपर्युक्तवाक्येन स्पष्टं यत् पुराकाले एव व्याकरणपरम्परायाः उद्भवोऽभवदिति। यथा भाषायां व्याकरणस्य महदावश्यकता तथैव साहित्यशास्त्रेषु व्याकरणभूमिका वर्त्तते। वैदिकवाङ्मये तु व्याकरणस्य प्रमुखस्थानं वर्त्तते। पाणिनीयशिक्षायां तु वेदस्य षड्ङ्गेषु व्याकरणस्य मुखेन तुलना कृताऽस्ति। उक्तमपि–

''शिक्षा घ्राणं तु वेदस्य मुखं व्याकरणं स्मृतम्।
तस्मात् साङ्गमधीत्यैव ब्रह्मलोके महीयते''[4]

यथा शरीरावयवेषु मुखमग्रगण्यमस्ति तथा च मुखेन विना भोजनादेरभावात् शरीरपुष्टेरभावः, तथैव व्याकरणं विना वेदरुप्यङ्गस्य रक्षाऽसम्भवा. उक्तमपि महाभाष्ये–''रक्षार्थं वेदानामध्येयं व्याकरणम्''[5] अर्थात् वैदिकवाङ्मयस्य रक्षार्थं व्याकरणमध्येयं, यतः वेदस्य षडङ्गेषु व्याकरणमग्रगण्यम्। व्याकरणस्य व्युत्पत्यनुसारं ''येन पदानां प्रकृतिप्रत्ययादयः विवेच्यन्ते तद् व्याकरणम्''। उक्तमपि व्याकरणप्रवेशिकायाम्–

''व्याक्रियन्ते व्युत्पाद्यन्ते निष्पाद्यन्ते (प्रकृतिप्रत्ययविभाग कल्पनया)
शब्दाः अनेनेति व्याकरणम्''[6]

ऋग्वैदिकमन्त्रे व्यारणशास्त्रस्योपमा वृषभेन सह प्रदत्ता। वृषभस्यास्य नामाऽख्यातोपसर्गनिपाताः इति चत्वारि शृङ्गानि, भूतभविष्यवर्त्तमानकालाः त्रयोऽस्य पादाः सुप्तिङावस्य शिरसी, सप्तविभक्तयश्चास्य हस्ताः वर्त्तन्ते। व्याकरणरुपी वृषभोऽयं उरः– –कण्ठशिरस्सु त्रिषु स्थानेषु बद्धः शब्दयते उक्तमपि–

''चत्वारि शृङ्गा त्रयोऽस्य पादाः द्वे शीर्षे सप्तहस्तासोऽस्य।
त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आ विवेश''[7]

व्याकरणशास्त्रे वर्ण–पद–समास–सन्धेः तथा च प्रकृतिप्रत्ययविभागकल्पनया शब्दरचनायाः विवेचनं क्रियते। अर्थानुसारं शब्दव्युत्पत्यै प्रयोगशुद्धतायै च व्याकरणज्ञानमावश्यकम्। महर्षिपतंजलिः महाभाष्ये अष्टाध्याय्याः व्याख्यारम्भे शास्त्रान्तरेषु व्याकरणभूमिकायाः प्रधानपंचप्रयोजनानि प्रस्तौति।

''रक्षोहागमलघ्वसंदेहाः प्रयोजनम्''[8]

व्याकरणशास्त्रस्य प्रधानोद्देश्यं वेदरक्षा। व्याकरणशास्त्रे वर्णसमाम्नायपदस्य वर्णोच्चारणस्य च नियमप्रतिपादनं प्रयोगप्रतिपादनञ्चास्ति। व्याकरणज्ञानाभावात् शास्त्रान्तरेषु प्रयुक्तानां सन्धि–समास–विभक्तेः ज्ञानाभावः, ज्ञानाभावात् शास्त्रान्तरेषु उक्तगूढतत्वानां ज्ञानाभावः। अतः वेदरक्षायै अन्यशास्त्रक्षणाय च व्याकरणज्ञानमावश्यकम्।

महाभाष्ये कथितमस्ति यत्–

''लोपावगमवर्णविकारज्ञो हि सम्यक् वेदान् परिपालयिष्यति''[9]

**''ऊहः खल्वपि**– न च सर्वैः लिङ्गैः न च सर्वाभिः विभक्तिभिः वेदे मन्त्राः निगदिताः ते च यज्ञगतेन पुरुषेण यथायथं विपरिणमयितव्या, तानवैयाकरणः न शक्नोति यथायथं विपरिणमयितुम्''[10] एवमेव वयं पश्यामः यत् शास्त्रान्तरेषु सन्धिकारणेन समासकारणेन वा शब्दार्थस्वरुपं परिवर्त्तते यथा–''हृष्यत्येको'' इत्यत्र हृष्यति+एकः इत्ययोः शब्दयोः रुपं परिवर्त्य हृष्यत्येकोऽभवत्। एवमेव पद्येषु अपि विभक्तिज्ञानाभावात् अन्वयज्ञानमध्याहारज्ञानमशक्यम्। अतः अर्थज्ञानाय शब्दस्वरुपज्ञानाय च व्याकरणज्ञानम्–आवश्यकम्।

### आगम
वेदरक्षायै व्याकरणस्य यावती भूमिका तावत्यैव शास्त्रान्तररक्षणायापि। महाभाष्यकारः भाषते यत् ब्राह्मणः फलविशेषस्य कामनाविरहितः सन् षडङ्गैः सह वेदाध्ययनं कुर्यात्। वेदः षडङ्गेषु प्रधानम्। प्रधाने च कृतः परिश्रमः शीघ्रफलदायी भवति। महाभाष्ये उक्तम्–
''ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्चेति। प्रधानं च षट्स्वङ्गेषु व्याकरणम्, प्रधाने च कृतः यत्नः फलवान्भवति''[11]। एवमेव शास्त्रान्तरेषु छन्दज्ञानाय ज्योतिषज्ञानाय च व्याकरणस्य महदावश्यकता।

### लघु
लघुपरिश्रमेन शास्त्रान्तरेषु उक्ततत्वानां ज्ञानाय व्याकरणमध्येयम्। यतः एकैकस्यापि शब्दस्य बहवोऽपभ्रंशाः। यथा–गोशब्दस्य गावी, गोणी, गोता इत्यादयः। तत्र गोशब्देनार्थज्ञानं करणीयं स एव च शुद्धप्रयोगः इति व्याकरणकार्यम्। उक्तमपि महाभाष्ये–''लघ्वर्थं चाध्येयं व्याकरणम्, ब्राह्मणेनावश्यं शब्दाः ज्ञेया इति। न चान्तरेण व्याकरणं लघुनोपायेन शब्दाः शक्याः ज्ञातुम्''[12]

### असन्देह
शास्त्राध्ययनसमये शब्दार्थे, शब्दस्वरुपे, वाक्यस्वरुपे, समासशब्दे च सन्देहोत्पत्तिः सम्भवा, किन्तु अवैयाकरणस्य सन्देहनिवृत्तिरसम्भवा व्याकरणज्ञानाभावात्। अतः ''असन्देहार्थं चाध्येयं व्याकरणम्''[13] यथा–राजपुरुषं आह्वयतु'' इत्युक्ते राज्ञः आह्वानं अथवा पुरुषस्याह्वानं इति सन्देहः। सन्देहनिवृत्यै व्याकरणज्ञानमावश्यकम् यतः अत्र तत्पुरुषसमासः सः चोत्तरपदप्रधानः भवति, अतोऽत्र राजसम्बन्धितस्य पुरुषस्यैवाह्वानं भवति न च केवलं राज्ञः अथवा पुरुषस्य। तच्च ज्ञानं व्याकरणज्ञानादेव भवति। एवमेव वैदिकवाङ्मयेऽपि द्रष्टुं शक्नुमः ''याज्ञिकाः पठन्ति स्थूलपृषतीमाग्निवारुणीमनड्वाही –मालभेतेति, तस्यां सन्देहः ''स्थूला चासौ पृषती च स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सा स्थूलपृषतीति, तां नावैयाकरणः स्वरतोऽध्यवस्यतीति। यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथान्तोदातत्वं ततस्तत्पुरुषः। एतादृक सन्देहनिवृत्यै व्याकरणशास्त्राध्ययनमावश्यकम्। महर्षि पतंजलिः उपर्युक्तपंचप्रयोजनैः सह त्रयोदशप्रयोजनान्यपि निरुपयति। सर्वाण्येतानि व्याकरणशास्त्रस्योपयोगितां साधयन्ति। वर्त्तमानकालेऽपि व्याकरणोपयोगिता न न्यूना। अनुशाकटायनं व्याकरणशास्त्रस्य प्रथमोपदेशः ब्रह्मा बृहस्पतयेऽददात्, तदनु बृहस्पतिः इन्द्राय, इन्द्रः भारद्वाजाय, भारद्वाजश्च ऋषिभ्यः, ऋषयश्च ब्राम्हणेभ्यः उपादिशन्. व्याकरणं शब्दसंस्कारेण मनांसि संशोधयति, तथा च शब्दः एव ब्रम्हज्ञापकोऽस्ति। अत एव प्राचीनकाले व्याकरणाध्यनाय प्रामुख्येन प्राध्यान्यमासीत्। अत एवोक्तम्–

''यद्यपि बहुनाधीषे तथापि पठ पुत्र व्याकरणम्।
स्वजनःश्वजनो माभूत् सकलः शकलः सकृच्छकृत्''[14]

अर्थात्– हे पुत्र! यद्यधिकं न जानीषे तथापि त्वं व्याकरणन्तु अवश्यमेव पठ। येन स्वजनः (सम्बन्धिः) स्थाने श्वजनः (कुक्कुरः) अर्थात्– सकारस्य स्थाने शकारोच्चारणं माभूदिति । सकलः (सर्वः) स्थाने शकलः (अवयवः) सकृत (एकदा) स्थाने शकृत् (मलम्) इति उच्चारणं मा भूदिति। तेनार्थस्य अनर्थः भविष्यति। अतः केवलं शास्त्राध्ययनायैव व्याकरणन्नावष्यकमपितु लोकव्यवहारायापि।

### निष्कर्ष
उपर्युक्तविवरणेन ज्ञायते यत् व्याकरणस्य न केवलं वैदिकवाङ्मये एव नावश्यकता अपितु पदे पदे आवश्यकता दरीदृश्यते। यथा–भाषा ज्ञानाय, शास्त्र ज्ञानाय, प्रयोगशुध्दतायै, शब्दस्वरूपाय, तथा च शब्दव्युत्पत्यै व्याकरणज्ञानमावश्यकम्, न केवलमावश्यकमपितु अनिवार्यमप्यस्ति, यतः भाषाधारितं व्याकरणं, व्याकरणाधारितानि च शास्त्राणि, अंतः शास्त्रान्तरेषु व्याकरणस्य महती भूमिका प्रतिभाति ।

### सन्दर्भ सूचि

1. अर्थप्रवृत्तितत्वानां. –वाक्यपदीय. कारिका 13 पृ. 113
2. पुराकल्प एतदासीत्.–महाभाष्य.पस्पशा0 पृ. 22
3. नूनं व्याकरणं.– महाभारत किष्किन्धा का. 3/29
4. शिक्षा घ्राणन्तु. – पाणिनीयशिक्षा – पृ. 43 म.भा. पस्पशा. पृ. 43
5. रक्षार्थं वेदानां.– महाभाष्य.पस्पशा0 पृ. 8
6. व्याक्रियन्ते.– व्याकरणप्रवेशिका पृ.7
7. चत्वारि श्रृङ्गा.– ऋक्. म. 4 सू. 58 मन्त्र. 3
8. रक्षोहागमलघ्व.– महाभाष्य.पस्पशा0 पृ. 8
9. लोपावगमवर्ण.– महाभाष्य.पस्पशा0 पृ. 8
10. न च सर्वैः लिं.– महाभाष्य.पस्पशा0 पृ. 9
11. ब्राह्मणेन निष्कारणो.– महाभाष्य.पस्पशा0 पृ. 9
12. लघ्वर्थं चाध्येयं.– महाभाष्य.पस्पशा0 पृ. 10
13. असन्देहार्थं चाध्येयं.– महाभाष्य.पस्पशा0 पृ. 10
14. यद्यपि बहुना. – व्याकरणदर्शनेतिहास, प्रथम खण्ड, पृ.5